No. ४६२४

Title महागणपति पूजापद्धति॰

Author ×

Extent ३५ पत्राणि Age सं. १८५५

Subject धर्मशास्त्रम्

महागणपतिपूजापद्धतिः

४६२५

4625

F. = 35

॥ ॥श्रीमहागणपतिपद्धति प्रारंभः॥ ॥

॥ग॰प॰२॥ श्रीगणेशाय नमः ॥ ध्यायं ध्यायं परार्द्धांगं दक्षिणामूर्त्तिमव्ययं ॥ महागणपतेः
पूजापद्धतिं व्यातनोम्यहं ॥१॥ तत्र श्रीमान्साधकेन्द्रो ब्राह्ममुहूर्त्ते उत्थाय शुचिरा
॥१॥ मने स्वस्तिकादिक्रमेणोपविश्य शिरस्थाधोमुखसहस्रदलकमलकर्णिकांतःश्वे
तवर्णं वराभयकरं शांतं नेत्रद्वयं द्विभुजं श्वेतमाल्यानुलेपनं स्वप्रकाशस्वरूपं स्ववाम
स्थितस्वप्रकाशारूण शक्त्यायुतं परमशिवाभिन्नं गुरुं करद्वयांगुष्ठमध्यमानामामेल
नरूपसंघट्टमुद्रया विभाव्य ॥ ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयूं सहखफ्रें स ॥१॥
हक्षमलवरयीं ह्सौं स्हौः ॥ अमुकानंदनाथ श्रीपादुकां पूजयामि ॥ अमुकशक्त्यां

वा श्री पादुकां पूजयामि॥ निस्मरेत॥ ततो मानसोपचारैः पूजयेत्॥ ऐं ह्रीं श्रीं लं पृ
थिव्यात्मकं गंधं समर्पयामि नमः॥ कनिष्ठाभ्यां॥ ह्रीं श्रीं हं आकाशात्मकं पुष्पं
समर्पयामि नमः॥ तर्जन्यंगुष्ठाभ्यां॥ ह्रीं श्रीं यं वाय्वात्मकं धूपं समर्पयामि नमः
अंगुष्ठ तर्जनीभ्यां॥ ह्रीं श्रीं रं वाय्वा दीपं समर्पयामि नमो गुष्ठ मध्यमाभ्यां॥ ह्रीं
श्रीं वं अमृतात्मकं नैवेद्यं समर्पयामि नमः॥ अंगुष्ठानामिकाभ्यां॥ ह्रीं श्रीं सं सर्वात्म
कं ताम्बूलं समर्पयामि नमः॥ सर्वांगुलीभिः॥ ततो योन्यां जलिमुद्रां दर्शयेत्॥ ततो
यथाशक्ति गुरुमंत्रं जपित्वा॥ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धि

॥ग.प॥

प्हूर्मे वतु मे देव त्वत्प्रसा त्वयि स्थैंता व्रती जयं निवेघ नत्वा स्तुवीत ॥ अखंड मंडला

॥२॥ कारं व्याप्तं येन चराचरं ॥ तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः ॥ अज्ञान तिमिरां

धस्य ज्ञानांजन शलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्री गुरवे नमः ॥ ततो मूल

2 धारादि ब्रह्मरंध्रांतं मूलविद्यां विभावयेत् ॥ ततः ॥ समुद्रमेखले देवि पर्वतस्तनमं

डले ॥ विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ इति पृथ्वीं प्रार्थ्य वहन्नासापुटे

पादपुरस्सरं वहिर्गत्वाऽवश्यं कं दंतधावनांतं कर्म कृत्वा स्नानसामग्रीमादाय नद्यां

दौ स्नानार्थं गच्छेत् ॥ अशक्तो गृहे वाहूतमोदकैः स्नायात् ॥ स्वसक्तौ कं स्नानं कृत्वा तं ॥२॥

त्रिकस्नानंकुर्यात्॥ यथादेशकालादिस्मृत्वा श्रीमहागणपतिप्रीत्यर्थंस्नानमहंक
रिष्यतिसंकल्प्य वक्ष्यमाणरीत्या प्राणायामषडंगन्यासौ कृत्वा॥ गंगेचयमुनेचैव
गोदावरिसरस्वति॥ नर्मदेसिंधुकावेरी गंगायांसन्निधिंकुर्वित्यादिना ॐमित्यंकुशमु
द्रयाऽर्कात्तीर्थमावाह्य गंगायामित्यत्रयथायथमूत्यत॥ अजकलशादवित्यर्घः॥ वमि
तिधेनुमुद्रयाऽमृतीकृत्य हुंनिकवचेनावगुंठ्य फडिति संरक्ष्य मूलेनैकादशधाभिमं
स्र्याभिमुखंद्वादशधावारि निक्षिप्य नाभिमात्रे इष्टदेवताचरणारविंदनिःसृतजलेनिम
ज्ज्यदेवतांध्यात्वा यथाशक्तिमूलमुच्चरन्त्रिर्निमज्ज्योत्थाय त्रियोनिमुद्रयाशिरस्यभि

षकं कुर्यात् ॥ मूलेनात्रिराचम्य ॥ ॐमित्योष्ठौ संमृज्य श्रीमिति करौ प्रक्षालयेत्
ह्रीमिति मुखं क्लीमिति नसोः ॥ ग्लौमिति चक्षुषोः ॥ गमिति कर्णयोः ॥ गणपतये
इति नाभौ ॥ वरवरदेति वक्षसि ॥ सर्वजनं मे वशमानय इति अंसे ॥ मानाय स्वाहेति वा
मांसस्पर्शनं कुर्यात् ॥ ततस्तीरमागत्य शुद्धवाससी परिधायाचम्य मृदोर्ध्वपुंड्रं धृ
त्वा तदुपरि भस्मना त्रिपुंड्रं बिभृयात् ॥ ततः स्वकल्पोक्तसंध्यां कृत्वा तांत्रिकीं कुर्या
त् ॥ पूर्ववदाचम्य गंगे च यमुने चेत्यंकुशमुद्रयाऽकौं तीर्थमावाह्य मूलेन त्रिर्भूमौ
निक्षिप्य सप्तधा तज्जलेन मूर्ध्नि अभिषिच्य ॥ वक्ष्यमाणरीत्या षडंगन्यासं कृत्वा वामह ॥२॥

स्मे जलं गृह्णीत्वा दक्षिणेन तज्जलमाघ्राय हं यं वं लं रं इति त्रिभिर्मंत्र्य मूलमुच्चरन् गलि
तोदकविंदुभिः सप्तधा तत्त्वमुद्रया मूर्ध्नि प्रोक्षणं कुर्यात् ॥ ततः शेषजलं दक्षहस्ते समादा
य तेजोरूपं ध्यात्वा नासिकाग्रं स्पर्शयित्वा इडयाकृष्य देहांतः पापं प्रक्षाल्य कृष्णव स २
र्णसमाप्लाव्य वर्णं तज्जलं पापपुरुषरूपं ध्यात्वा पिंगलया विरेच्य पुरः कल्पितवज्रशि
लायां फडिति तज्जलं ताडयेत् ॥ ततो हस्तं प्रक्षाल्याचम्य ह्रीं हंसः इति अनेन वा ॥ ॐ ह्रीं
घृणिः सूर्य आदित्य इत्यनेन वा ॥ ॐ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि तन्नो दंति प्र
चोदयात् ॥ ॐ सूर्यमंडलस्थाय ॥ ॐ महागणपतये देवतायै नमः इति त्रिरर्घं दत्त्वा

॥४॥ 5

दत्वा देवीं ध्यात्वा यथाशक्ति गायत्री मंत्रं जपेत् ॥ ध्यानं तु ॥ उद्यदादित्यसंकाशां पु
स्तकाक्षकरां स्मरेत् ॥ कृष्णाजिनांबरां ब्राह्मीं ध्यायेत्तारां वितेंवरे ॥ इति प्रातः ॥ म
ध्याह्ने श्यामवर्णां च चतुर्बाहां शंखचक्रलसत्करां ॥ गदापद्मधरां देवीं सूर्यासनकृ
ताश्रयां ॥ इति मध्याह्ने ॥ सायाह्ने वरदां देवीं गायत्रीं संस्मरेद्यदा ॥ शुक्लां शुक्लांबरधृ
तां वृषासनकृताश्रयां ॥ त्रिनेत्रां वरदां पाशशूलं च नृकरोटिकां सूर्यमंडलमध्य
स्थां ध्यायेद्देवीं समभ्यसेत् ॥ इति ध्यात्वा यथाशक्ति मूलं जपित्वा क्षरीस्या गायत्रीं ज ॥४॥
पेदिति संध्या ॥ ततः ॐ देवांस्तर्पयामि ॥ ॐ ऋषींस्तर्पयामि ॥ २ ॥ ॐ पितॄंस्तर्पयामी ॥ २

१ पित्वा जले मूलदेवतामावाह्य मूलमुच्चरन् ॥ सांगां सावरणं सायुधं सशक्तिकं श्री महागणपतिं तर्प ११
गुरुं परमगुरुं परात्परगुरुं परमेष्ठिगुरुं च तर्पयामि नम इति चतुः संतर्प्य ह्रीं हंसः ॥ इ
ति सूर्यायार्घ्यं दत्वा हंसः सोहमिति उपस्थाय सवितृमंडले तीर्थं विसृज्य मौनी जल
भृतं पात्रमादाय यागस्थानमागच्छेदिति जलाशयकृत्यं ॥ ह्रीं हंसः सूर्याय नम इति
इति सूर्यं संपूज्य पूर्ववदाचम्य द्वारिसामान्यार्घ्यं कुर्यात् ॥ यथा जलेन चतुरस्रेन दंत द्वितत्रि
कोणं कृत्वा ॥ ॐ आधारशक्तये नम इति संपूज्य फडिति पात्रं प्रक्षाल्य साधारां न धायनम इति
जलेनापूर्यांकुशमुद्रया ऽक्रों ह्रूं गंगे च यमुने चेत्यादिना तीर्थमावाह्य ॥ लं मिति गंध पुष्पं प्रक्षिप्य
धेनुमुद्रां प्रदर्श्य ॥ ॐ मित्यष्टधा जपित्वा फडिति तज्जलैः [illegible] द्वारस मभ्युक्ष्य द्वारदेवताभ्यान
ग्री मे

जो ३

श्री

॥ग॥प॥ मइति संपूज्य ततो दक्षपादपुरःसरं गृहांतः प्रविश्य नैऋत्यां वास्तुपुरुषायनमः ॥ ॐ ब्रह्म

॥१॥ णे नमः ॥ ततो मूलमुच्चरन् दिव्यदृष्ट्या दिव्यान्विघ्नानुत्सार्य अस्त्राय फडिति जलेनांतरिक्ष

गान्विघ्नानुत्सार्य वामपार्ष्णीघातत्रयेण फडिति भौमान् [illegible]ज चंदन सिद्धार्थ भस्म दूर्वा

5 कुशाक्षता ॥ विकिरा इति संदिष्टाः सर्वविघ्नौघनाशकाः ॥ सप्तविकिरानादाय ॥ ॐ अपस फडिति

र्पंतु ये भूता ये भूता विघ्नसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ इति वि जस्मान

कीर्य ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं ॥ सर्वेषामविरोधेन ब्रह्मकर्म स ॥५॥

मारभे तदिति जलेनाव्रदिह भूतान्युत्साद्य तीक्ष्णदंष्ट्र महाकाय कल्पांत दहनोपम ।

भैरवाय नमस्तस्य मनुज्ञां दातुमर्हसीति भैरवानुज्ञां गृहीत्वा ह्रीं आधारशक्तिकम
लासनाय नम इत्यासने संपूज्यासनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छंदः कूर्मो देव
ता आसनपरिग्रहे विनियोगः ॥ ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं
च धारय मां देवि पवित्रं कुरु चासनं इति पठित्वा स्वस्तिकादि क्रमेण प्रविशेत् ॥ मूलमं
त्राभिमंत्रितेन पंचगव्येन मंडपं संशोध्य दक्षिण भागे पूजाद्रव्याणि वामे सुवासि
तां च पूर्णकुंभं हस्तप्रक्षालनार्थं पात्रांतरं पृष्ठे च स्थापयेत् ॥ सर्वदिक्षु घृतदीपांश्च
ततः पुरांजलिर्भूत्वा वामे गं गुरुभ्यो नमः ॥ पं परमगुरुभ्यो नमः ॥ पं परात्परगुरुभ्यो नमः

॥ग॰प॰॥ पंपरमेष्ठीगुरुभ्यो नमः ॥ दक्षिणे ॥ ॐ विघ्नविनाशिने नमः ॥ मध्ये ॥ श्रीमहागणपतये

॥६॥ नमः ॥ ततः फडिति गंधपुष्पाभ्यां करौ संशोध्यांगुष्ठोर्ध्वं तालत्रयं दत्वा छोटिकाभिर्द

6 शबंधं कृत्वा रमिति जलधारयाग्निप्राकारं विचिंत्य भूतशुद्धिं कुर्यात् ॥ यथा अंके उत्तानौ

करौ कृत्वा सोहमिति जीवात्मानं हृत्स्थं प्रदीपकलिकाकारं मूलाधारस्थकुंडलिन्या

सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाख्यषट्चक्रा ग

णि भित्वा शिरोवस्थाधोमुखसहस्रदलकर्णिकांतर्गतपरमात्मनि तत्त्वसंयोज्य तेनै ॥६॥

व पृथिव्यप्तेजोवाय्वाकाशगंधरूपरसस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रवाक्

पाणिपादपायूपस्थमनोबुध्यहंकारचित्तंचतुर्विंशतितत्वानितल्लीनानिभावयेत्व्यय
मितिवायुवीजंधूम्रवर्णंवामनासापुटेविभाव्यतस्यषोडशवारजपेनवायुनादेह
मापूर्यनासापुरोधत्वातस्यचतुःषष्ठिवारजपेनकुंभकंकृत्वावामकुक्षिस्थकृष्णवर्ण
पापपुरुषेणसहस्वदेहंसंशोष्यद्वात्रिंशद्वारजपेनदक्षिणनासयावायुरेचयेत्त
ताद्दक्षिणनासानासापुटेरमितिवह्निवीजंरक्तवर्णंध्यात्वातस्यषोडशवारजपेन
वायुनादेहमापूर्यनासापुटेधृत्वातिवच्चतुःषष्ठिवारजपेनकुंभकंकृत्वावामकुक्षि
स्थकृष्णवर्णपापपुरुषेणसहदेहंदग्ध्वातस्यद्वात्रिंशद्वारजपेनवामनासयाभस्म

॥ग.प॥ ॥७॥ 7

नासद्दशनैवांयुंरेचयेत॥ ततःठमिति चंद्रवीजं शुल्कवर्णंवामनासिकायांध्यात्वा
षोडशवारजपेन ललाटचंद्रं मीत्वा वमिति वरुणवाजं तस्य चतुःषष्टिवारज
पेन तस्माल्ललाटचंद्रात्ललितं सुधया मातृकावर्णात्मिकया समस्तं देहं विरच
य्य लमिति पृथ्वीवीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिंत्य दक्षिणेन वायुं रे
चयेत् ततो ओं सोहमिति मंत्रेण देहे सजीवं विभाव्य तेनैव मंत्रेण निजां तनुं स्थि
रीकृत्य हंस इति मंत्रेण जीवं परशिवे संयोज्य सोहमिति स्वस्थानमानाय कुंड ७
लिनीं पृथिव्यादीनि च यथास्थानं प्रानयेत् इति भूतशुद्धिः॥ अथ प्राणप्रतिष्ठा

ततु ॐ मंत्रमहोदधौ ॥ ॐ अस्यश्री प्राणप्रतिष्ठा मंत्रस्य अजेशपद्मजा ऋषयः
ऋग्यजुः सामानि छंदांसि ॥ प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः ॥ क्रों कीलकं प्राणप्र
तिष्ठापने विनियोगः ॥ अजेशपद्मज ऋषिभ्यो नमः ॥ शिरसि ॥ ऋग्यजुः साम छंदे
भ्यो नमो मुखे ॥ प्राणशक्तिर्देवतायै नमो हृदि ॥ आं बीजाय नमो गुह्ये ॥ ह्रीं शक्तये न
मः पादयोः ॥ क्रों कीलकाय नमः सर्वांगे ततः करांगन्यासौ ॥ ङं कं खं गं घं आका
श वायु तेजो जल पृथिव्यात्मने अंगुष्ठाभ्यां नमः ॥ हृदयाय नमः ॥ ञं चं छं झं जं श
ब्द स्पर्श रस गंधात्मने तर्जनीभ्यां नमः ॥ शिरसि स्वाहा ॥ णं टं ठं डं ढं ॥ श्रोत्रत्वक्च

॥ग॰प॥ श्र. जिह्वा घ्राणात्मने मध्यमाभ्यां नमः॥ शिखायै वषट्॥ नंतं थं धं दं॥ वाक्पाणिपाद
॥ल॥ पायूपस्थात्मने अनामिकाभ्यां नमः॥ कवचाय हुं॥ मं पं फं वं भं॥ वक्तव्यादानगमनवि
सर्गानंदात्मने कनिष्ठिकाभ्यां नमः॥ अस्त्राय फट्॥ अथ ध्यानं॥ पाशं चापासृक्क
8 पाले सृणीषून् श्र लेहस्ते बिभ्रती रक्तवर्णां॥ रक्ताद्गन्धस्यान्तरक्तांबुजस्थां देवीं ध्याये
त्प्राणशक्तिं त्रिनेत्राम्॥ इति ध्यात्वा मानसैः प्रपूज्य मंत्रं जपेत्॥ आं ह्रीं क्रों यं रं लं वं शं
षं सं हों॥ ॐ सं सं हंसः ह्रीं ॐ हंसः मम प्राणा इह प्राणाः॥ आं ह्रीं मम जीव इह स्थितः॥ ॥८॥
आं ह्रीं मम सर्वेन्द्रियाणि॥ आं ह्रीं क्रों॥ वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इह॥

गत्यसुरंवचिरं।तिष्ठंतु स्वाहा॥ ॐ हंसंसंहंसः ह्रीं॥ ॐ मंत्रमहोदधौ। एवं प्राणान्प्रतिष्ठाप्य
मातृकान्यासं कुर्यात्॥ ततो मातृकान्यासः॥ अस्य मातृकामंत्रस्य ब्रह्मा ऋषिः गायत्री छं
दः॥ मातृका सरस्वती देवता हलो बीजानि॥ स्वराः शक्तयः लिपिन्यासे विनियोगः॥ ब्रह्मण ऋ
षये नमः शिरसि गायत्री छंदसे नमो मुखे॥ मातृका सरस्वती देवतायै नमो हृदि हल्भ्यो बीजे
भ्यो नमो गुह्ये॥ स्वरेभ्यः शक्तिभ्यो नमः पादयोः॥ ततः करांगन्यासौ॥ अं कं खं गं घं ङं आं अं
गुष्ठाभ्यां नमः॥ इं चं छं जं झं ञं ईं तर्जनीभ्यां नमः॥ उं यं रं लं वं शं षं सं हं लं क्षं अः करतलकरपृ
ष्ठाभ्यां नमः॥ अं कं खं घं ङं आं हृदयाय नमः॥ इं चं छं जं झं ञं ईं शिरसे स्वाहा॥ उं टं ठं डं ढं णं ऊं शि

॥ग॥म॥ खायैवषट्॥ ऐं नं षं दं धं नं ऐं कवचाय हुं॥ ओं पं फं वं भं मं औं नेत्रत्रयाय वौषट्॥ अं यं रं लं वं
शं षं सं हं लं क्षं अः अस्त्राय फट्॥ अथांतर्मातृका॥ अकारादि षोडशवर्णान्सबिंदून्कंठ
॥९॥ मूले षोडशदले अं नमः इत्यादि॥ अं नमः इत्यंतं प्रागादि प्रादक्षिण्येन न्यसेत्॥ हृदि द्वा
दशदले कादिठांतांस्तथैव न्यसेत्॥ नाभौ दशदले तथैव डादिफांतान्न्यसेत्॥ एवं लिंगे
१ षट्दले वादिलांतान् गुदे चतुर्दले वादिसांतान्॥ भ्रूमध्ये द्विदले हं नमः॥ क्षं नमः इति न्य
स्य वाह्यमातृकां ध्यायेत्॥ पंचाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां भास्वन्मौ ॥९॥
लिनिबद्धचंद्रशकलामापीनतुंगस्तनीं॥ मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजै

विद्यानां विशदप्रभां त्रियनां वाग्देवतामाश्रये ॥ एवं ध्यात्वा न्यसेत् ॥ ॐ अं नमो लला
टे ॥ आं नमो मुखवृत्ते ॥ इं नमो दक्षिणनेत्रे ॥ ईं नमो वामनेत्रे ॥ उं दक्षिणकर्णे ॥ ऊं वामकर्णे ॥
ऋं दक्षिणनासापुटे ॥ ॠं वामनासापुटे ॥ लृं दक्षिणगंडे ॥ लॄं वामगंडे ॥ एं ओष्ठे ॥ ऐं अध
रे ॥ ओं ऊर्ध्वदंतपंक्तौ ॥ औं अधोदंतपंक्तौ ॥ अं ब्रह्मरंध्रे ॥ अः नमो मुखे ॥ कं दक्षिणबाहु जिह्वायां
मूले ॥ खं कूर्परे ॥ गं मणिबंधे ॥ घं अंगुलिमूले ॥ ङं नमोंगुल्यग्रे ॥ चं वामबाहुमूले ॥ छं कूर्प
रे ॥ जं मणिबंधे ॥ झं अंगुलिमूले ॥ ञं नमो गुल्यग्रे ॥ टं दक्षपादमूले ॥ ठं जानुनि ॥ डं गुल्फे
ढं गुलिमूले ॥ णं नमो[illegible]ग्रे ॥ तं वामपादमूले ॥ थं जानुनि ॥ दं गुल्फे ॥ धं अंगुलिमूले ॥ नं

गुल्यग्रे

नाभौ मं स्कंधे

११०॥ अंगुल्यग्रे ॥ पं दक्षिणपार्श्वे ॥ फं वामपार्श्वे ॥ बं पृष्ठे ॥ भं उदरे ॥ यं हृदि ॥ रं दक्षबाहुमूले ॥ लं ककु
दि ॥ वं वामबाहुमूले ॥ शं हृदयादि दक्षकरे ॥ षं हृदयादि वामकरे ॥ सं हृदयादि दक्षपा
दे ॥ हं हृदयादि वामपादे ॥ ळं हृदयादि उदरे ॥ क्षं हृदयादि मुखे ॥ प्रणवादि नमोंतता
सर्वत्र ॥ अंगुष्ठानामिकाभ्यां सर्वस्थानेषु न्यासः ॥ इति सृष्टिन्यासः ॥ अथ स्थितिन्या
सः ॐ ष्यादि पूर्ववत् ॥ विश्वपाश्विनी मातृका सरस्वती देवता ॥ विश्वपाश्विन्यै मातृका
सरस्वत्यै देवतायै नमो हृदये ॥ इति विशेषः ॥ ध्यानं ॥ उपविष्टां बलीमांके ध्यायेद्देवीम
नन्यधीः ॥ मृगबाले वरं विद्यामक्षस्रजं दधत्करैः ॥ बालां विद्यां लसद्रूपां वहू ध्येयः श्री ॥११०॥

कोगिरे॥ ऐं वं ध्यात्वा डें नमः दक्षपादगुल्फे इत्यादि ठं नमः॥ दक्षपादजानुनि इत्यंतं न्यसेदि
ति स्थितिन्यासः ऋषि छंदश्चात्मेव॥ शत्रुसंहारिणी मातृका देवी॥ शत्रुसंहारिण्यै मात
कासरस्वत्यै नमो हृदये इति विशेषः॥ पूर्ववदन्यत्॥ अक्षस्रक्टंकसारंगखड्गहस्तां त्रिलोच
नां॥ चंद्रमौलीं कुचानम्रां रक्ताजस्थां गिरं भजे॥ इति ध्यात्वा सं नमः॥ इत्यादि॥ अं नमः इत्यंतं
विलोममात्वर्णान्यथास्थानं न्यसेदिति संहारन्यासः॥ सृष्टिन्यासं स्थितिन्यासं च पुनः कुर्यात्
तत्रांगुलिनियमः स्वेच्छांतरे॥ ललाटे चानामिका मध्ये विल्वसन्मुख वृत्तके॥ तर्जनी मध्यमानामा हृ
दानामवनेत्रयोः॥ अंगुष्ठे कर्णयोर्न्यस्य कनिष्ठांगुष्ठकौ नसोः॥ मध्यानिरमोगंडयोस्त्वम

ध्यमामाधयोर्न्यसेत्॥ अनामांगुष्ठेनामिदेशे सर्वाःकुत्ताश्च विन्यसेत्॥ हृदये च ततस्पर्श
॥११॥ मेसयोश्च ककुस्थले ॥ ह स्पर्वं हस्तय लुसेमुखेषु तलमवच ॥ एताश्च मातृका मुद्राः क्रमे
णपरिकीर्तिताः॥ अज्ञात्वा विन्यसेद्यस्तु न्यासस्यानस्य निष्फलं इति॥ अथ गणेशमातृ
कान्यासः॥ अस्य श्रीगणेशमातृकामंत्रस्य गणक ऋषिः॥ निचृद्गायत्री छंदः शक्ति वि
नायको देवता॥ गणेशमातृकान्यासे विनियोगः॥ गणकाय ऋषये नमः॥ शिरसि॥ निचृ
द्गायत्री छंदसे नमो मुखे॥ शक्तिविनायकाय देवतायै नमो हृदये॥ गां अंगुष्ठाभ्यां नमः ॥११॥
गः करतलकरपृष्ठाभ्यां नमः॥ गां हृदयाय नमः॥ गीं शिरसे स्वाहा॥ गूं शिखायै वषट् गैं

ग: ३१ स्त्रायफट

कवचायहुं ॥ गौनेत्रत्रयायवौषट् ॥ ध्यानं ॥ पाशांकुशवराभीतिपाणिरक्ताब्जहस्तया
प्रियायांलिंगितं नरस्तं त्रिनेत्रं गणपं भजे ॥ १ ॥ एवंध्यात्वान्यसेत् ॥ ॐ अंगंविघ्नेशह्रीभ्यांनमो
ललाटे ॐ आंगंविघ्नराजश्रीभ्यांनमोमुखवृत्ते ॥ ॐ इंगंविनायकपुष्टिभ्यां दक्षनेत्रे
ॐ ईंगंशिवोत्तमशांतिभ्यांवामनेत्रे ॥ ॐ उंगंविघ्नहृत्स्वस्तिभ्यां दक्षकर्णे ॥ ॐ ऊंगंविघ्न
हृत्सरस्वतीभ्यांवामकर्णे ॥ ॐ ऋंगंगणस्वाहाभ्यांदक्षिणनासापुटे ॥ ॐ ॠंगंएकदंतमे
धाभ्यांवामनासापुटे ॥ ॐ ऌंगंद्विदंतकांतिभ्यांदक्षगंडे ॥ ॐ ॡंगंगजवक्त्रकामिनीभ्यां
वामगंडे ॥ ॐ एंगंनिरंजनमोहिनीभ्यांओष्ठे ॥ ॐ ऐंगंकपर्दिनदीभ्यां अधरे ॥ ॐ ओंगंदी

॥ग.प॥ घे जिह्वू पार्वती न्यां॥ ऊर्ध्वदंतपंक्तौ॥ ॐ औं गं शंकुकर्णाज्ञालिनी न्यां॥ अधोदंतपंक्तौ॥ ॐ
॥१२॥ अं वृषध्वजनंदा न्यां॥ ब्रह्मरंध्रे॥ ॐ अः गं गणनायक सुरेशा न्यां॥ मुखे॥ ॐ कं खं गं गजे
न्द्रकामरूपिणी। न्यां॥ दक्षिणबाहुमूले॥ ॐ खं गं शूर्पकर्णोमा न्यां॥ कर्परे॥ ॐ गं गं त्रिलोच
न तेजोवती। न्यां मणिबंधे॥ ॐ घं गं लंबोदर सत्या न्यां नमोंगुलिमूले॥ ॐ ङं गं महानंद
12 विघ्नेशी। न्यां नमोंगुल्यग्रे॥ ॐ चं गं चतुर्मूर्ति सुरूपिणी न्यां॥ वामबाहुमूले॥ ॐ छं गं स
दाशिवकामदा न्यां॥ वामकूर्परे॥ ॐ जं गं आमोदमदजिह्वा न्यां॥ मणिबंधे॥ ॐ झं गं दु ॥१२॥
र्मुखभूति न्यां॥ अंगुलिमूले॥ ॐ ञं गं सुमुखभौतिका न्यां नमोंगुल्यग्रे॥ ॐ टं गं प्रमो

दशिनाभ्यां ॥ दक्षपादमूले ॥ ॐ ठं गं भूरसंजोगीभ्यां नमोंगुलिमूले ॥ ॐ णं गं वारविकर्णाभ्यां
नमोंगुल्यग्रे ॥ ॐ तं गं षण्मुखभृकुटीभ्यां वामपादमूले ॥ ॐ थं गं वरदलज्जाभ्यां ॥ जानुनी ॥ ॐ
दं गं वामदेवदीर्घघोणाभ्यां गुल्फे ॥ ॐ धं गं वक्रतुंडधनुर्धराभ्यां नमोंगुलिमूले ॥ ॐ नं गं द्र
मणिकामां ~~धाभ्यां~~ दिरंडयामिनीभ्यां नमोंगुल्यग्रे ॥ ॐ पं गं सेनानिरात्रिभ्यां ॥ दक्षपार्श्वे ॥ ॐ
फं गं ग्रामणिकामांधाभ्यां वामपार्श्वे ॥ ॐ बं गं मत्तशशिप्रभाभ्यां नमः पृष्ठे ॥ ॐ भं गं विमत्तलो
ललोचनाभ्यां नाभौ ॥ ॐ मं गं मत्तवाहनचंचलाभ्यां उदरे ॥ ॐ यं गं त्वगात्मजटिदीप्तिभ्यां
हृदये ॥ ॐ रं गं असृगात्ममुंडिप्रभगाभ्यां ॥ दक्षबाहुमूले ॥ ॐ लं गं मांसात्मखड्गिदुर्मे

॥ग॰प॥

गाभ्यां ककुदि ॥ ॐ वंगं मेदं ज्ञात्मवरेतस्य शिवाभ्यां वामबाहुमूले ॥ ॐ शंगं अस्थ्यात्म
॥१३॥ वृषकेतनभगाभ्यां हृदयादि दक्षकरे ॥ ॐ षंगं मज्जात्मभस्म प्रियभगिनीभ्यां हृद
यादिवामकरे ॥ ॐ संगं शुक्रात्मगणेशभोगिनीभ्यां हृदयादि दक्षपादे ॥ ॐ हंगं प्रा
13 णात्ममेघनादप्रभुभगाभ्यां हृदयादि वामपादे ॥ ॐ ळंगं जीवात्मव्यापिकालत्रिभ्यां
हृदयाद्युदरे ॥ ॐ क्षंगं क्रोधात्मगणेश्वरकालिकाभ्यां नमो हृदयादिमुखे न्यसेदिति
मत्तेया ऋषिः गायत्री छंदः ॥ गणेशमातृकान्यासः ॥ अथ कलामातृकान्यासः ॥ अस्य ॥१३॥
श्रीकलामातृकामंत्रस्य प्रजापतिऋषिः गायत्री छंदः ॥ शारदादेवता कलामातृका

न्यासे विनियोगः॥ प्रजापतये ऋषये नमः शिरसि॥ गायत्री छंदसे नमो मुखे॥ शार
दायै देवतायै नमो हृदये॥ कलामातृकान्यासे विनियोगः॥ अं ॐ आं अंगुष्ठाभ्यां नमः
इं ॐ ईं तर्जनीभ्यां नमः॥ उं ॐ ऊं मध्यमाभ्यां नमः॥ एं ॐ ऐं अनामिकाभ्यां नमः॥ ओं ॐ
औं कनिष्ठिकाभ्यां नमः॥ अं ॐ अः करतलपृष्ठाभ्यां नमः॥ अं ॐ आं हृदयाय नमः॥
इं ॐ ईं शिरसे स्वाहा॥ उं ॐ ऊं शिखायै वषट्॥ एं ॐ ऐं कवचाय हुं॥ ओं ॐ औं नेत्रत्रयाय
वौषट्॥ अं ॐ अः अस्त्राय फट्॥ ध्यानं॥ शंखचक्राब्जपरशुकपालेणाक्षमालिकाः
पुस्तकामृतकुंभौ च त्रिशूलं दधतीं करैः॥ सितपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः॥

सीतपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः ॥ पंचास्यसंयुतां चंद्रसकांतिशारदां भजे ॥ ॐ
॥१४॥ 14 अं निवृत्तिकलायै ललाटे ॥ ॐ आं प्रतिष्ठाकलायै नमो मुखवृत्ते ॥ ॐ इं विद्याकलायै दक्षिण
नेत्रे ॥ ॐ ईं शांतिकलायै ॥ वामनेत्रे ॥ ॐ उं इंधिकाकलायै ॥ दक्षकर्णे ॥ ॐ ऊं दीपिकाकलायै
वामकर्णे ॥ ॐ ऋं रेचिकाकलायै ॥ दक्षनासापुटे ॥ ॐ ॠं मोचिकाकलायै वामनासापुटे
ॐ लृं पराकलायै दक्षगंडे ॥ ॐ लॄं सूक्ष्मकलायै वामगंडे ॥ ॐ एं सूक्ष्मामृताकलायै ओ
ष्ठे ॥ ॐ ऐं ज्ञानामृताकलायै ॥ अधरे ॥ ॐ ओं आप्यायिनीकलायै ॥ ऊर्ध्वदंतपंक्तौ ॥ ॐ ॥१४॥
औं व्यापिनीकलायै ॥ अधोदंतपंक्तौ ॥ ॐ अं व्योमरूपाकलायै ब्रह्मरंध्रे ॐ अः ॥ अनं

नमोंगुलिमूले ४

ता कलायै ॥ मुखे ॥ ॐ कं स्वच्छि कलायै ॥ दक्ष बाहुमूले ॥ ॐ खं ऋद्धि कलायै ॥ कूर्परे ॥ ॐ गं स्मृ
ति कलायै ॥ मणिबंधे ॥ ॐ घं मेधा कलायै ॥ अंगुलिमूले ॥ ॐ ङं कान्ति कलायै नमो गुल्यग्रे
ॐ चं लक्ष्मी कलायै वामबाहुमूले ॥ ॐ छं धृति कलायै ॥ कूर्परे ॥ ॐ जं स्थिरा कलायै ॥ मणि
बंधे ॥ ॐ झं स्थिति कलायै ॥ दमांगुलिमूले ॥ ॐ ञं सिद्धि कलायै नमो गुल्यग्रे ॥ ॐ टं जरा क
लायै ॥ दक्षपादमूले ॥ ॐ ठं पालिनी कलायै ॥ जानुनि ॥ ॐ डं शान्ति कलायै ॥ गुल्फे ॥ ॐ ढं ईश्वरी
कलायै नमोंगुलिमूले ॥ ॐ णं रति कलायै नमो गुल्यग्रे ॥ ॐ तं कामिका कलायै ॥ वामपा
दमूले ॥ ॐ थं वरदा कलायै जानुनि ॥ ॐ दं आ – ह्लादिनी कलायै ॥ गुल्फे ॥ ॐ धं प्रीति कला

॥ग.प॥ येनमोंगुलिमूले॥ ॐ नंदीर्घाकलायेनमोंगुल्यग्रे॥ ॐ पंतीक्ष्णाकलाये॥ दक्षपार्श्वे॥ ॐ
॥१५॥ फं रौद्रीकलाये। वामपार्श्वे॥ ॐ बं भयाकलाये। पृष्ठे॥ ॐ भं निद्राकलाये॥ नाभौ॥ ॐ मं
तंद्रीकलाये॥ उदरे॥ ॐ यं क्षुधाकलाये। हृदि॥ ॐ रं क्रोधिनीकलाये॥ दक्षबाहुमूले॥ ॐ लं
15 क्रियाकलाये॥ ककुदि॥ ॐ वं उत्कारिणीकलाये॥ वामबाहुमूले॥ ॐ शं मृत्युकलाये। हृ
दयादिदक्षकरे॥ ॐ षं पीताकलाये हृदयादिवामकरे॥ ॐ सं श्वेताकलाये॥ हृदयादिदक्ष
पादे॥ ॐ हं अरुणाकलाये॥ हृदयादिवामपादे॥ ॐ ळं अमिताकलाये। हृदयाद्युदरे॥ ॐ क्षं ॥१५॥
अनंताकलाये॥ नमो हृदयादिमुखे॥ न्यसेदिति॥ निवृत्यादिकलान्यासः॥ अथ प्राणायामः॥

कनिष्ठानामिकांगुष्ठैर्नासापुटं धृत्वा प्रणवस्य समस्तमंत्रस्य वा मंत्रबीजस्य वाषोडस धाज ग
पन वामनासपुटेन वायुमापूर्य चतुःषष्ठि वारजपेन दक्षेन वायुं रेचयेदिति त्रिकः॥ प्राणायामः
एवंत्रिः एतत्करणाशक्तोनु चतुर्द्धा वामनासापूर्यो भाभ्यां षोडश धा कुंभयित्वाऽष्टवारं दक्ष
णा रेचयेत्॥ पुनर्दक्षेणापूर्यो भाभ्यां कुंभयित्वा वामेन रेचयेत्॥ पुनर्वामेनापूर्यो भाभ्यां कुं
भयित्वा दक्षेण रेचयेदित्येकः प्राणायामः॥ एवं त्रिः॥ अथ पीठन्यासः॥ हृदि॥ ॐ आधारशक्त्यै
ये नमः ॐ कूर्माय नमः॥ ॐ अनंताय नमः॥ ॐ पृथ्व्यैः॥ ॐ क्षीरसागराय नमः॥ ॐ श्वेतद्वी
पाय ॐ मणिमंडपाय॥ ॐ कल्पवृक्षाय॥ ॐ मणिवेदिकायै॥ ॐ रत्नसिंहासनाय नमः

॥१।५॥ ततोदधिसास्कंधे॥ ॐ धर्माय।वामस्कंधे॥ ॐ ज्ञानाय।वामोरौ॥ ॐ वैराग्याय।दक्षोरौ॥ ॐ
॥१६॥ ऐश्वर्याय मुखे॥ ॐ अधर्माय।वामपार्श्वे॥ ॐ अज्ञानाय।नाभौ॥ ॐ अवैराग्याय।दक्षपार्श्वे
ॐ अनैश्वर्याय।पुनर्हृदि॥ ॐ अं अनंताय॥ ॐ पद्मनाभाय॥ ॐ अं सूर्यमंडलाय द्वाद
16 शकलात्मने॥ सं सत्वाय॥ रं रजसे॥ तं तमसे॥ आं आत्मने॥ अं अंतरात्मने॥ ॐ पंप
रमात्मने॥ ह्रीं ज्ञानात्मने॥ हृत्पद्मस्य पूर्वादिकेसरेषु॥ ॐ तीव्रायै नमः॥ ॐ ज्वालिन्यै
ॐ नंदायै॥ ॐ भोगदायै॥ ॐ कामरूपिण्यै॥ ॐ उग्रायै॥ ॐ तेजोवत्यै॥ ॐ सत्यायै॥ ॐ वि ॥१६॥
घ्ननाशिन्यै॥ तदुपरि मध्ये॥ ॐ सर्वशक्तिकमलासनाय नमः इति विन्यसेत्।इति पीठं

न्यासः ॥ अथ मंत्रोद्धारः ॥ शारदायां ॥ श्रीशक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत् ॥ ङेंतं गण
पतिं पश्चाद्वरांते वरदं पदं ॥ उच्चा सर्वजनं मेन्ते वशमानाय ठद्वयं ॥ अष्टाविंशत्यक्षरो यं ता
रादो मनुरीरितः ॥ भूबीजमाह ॥ स्मृतिस्थं मांसमो बिंदुयुक्तं भूबीजमीरितं ॥ स्मृतिर्गकारः
मांसं लकारः ॥ ओबिंदुयुक्तो नेन ग्लौ मिति मंत्रोद्धारः ॥ अस्य श्रीमहागणपतिमंत्रस्य गणक ऋषिः ॥
निचृद्गायत्री छंदः ॥ महागणपतिर्देवता गं बीजं ॥ स्वाहा शक्तिः ॥ ग्लौं कीलकं इष्टसिध्यर्थे जपे विनियो
गः अथ ऋष्यादिन्यासः ॥ गणक ऋषये नमः शिरसि ॥ निचृद्गायत्री छंदसे नमो मुखे ॥ गणप
तये देवतायै नमो हृदि ॥ गं बीजाय नमो गुह्ये ॥ स्वाहाशक्तये नमः पादयोः ॥ ग्लौं कीलकाय नमः ॥ ४५

॥ग.प॥ नाभौ न्यसेत् इति ऋष्यादिन्यासः ॥ अथांगुलिन्यासः ॥ ॐ श्रीं ह्रीं क्लीं गं गां अंगुष्ठाभ्यां नमः ॥ ॐ
॥१७॥ श्रीं ह्रीं क्लीं ग्लौं गं गीं तर्जनीभ्यां नमः ॥ ॐ श्रीं क्लीं ग्लौं गं गूं मध्यमाभ्यां नमः ॥ ॐ श्रीं ह्रीं ग्लौं गं गैं अ
नामिकाभ्यां नमः ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गौं कनिष्ठिकाभ्यां ॥ ॐ श्रीं ह्रीं क्लीं गं गः करतलपृष्ठाभ्यां
17 इत्यंगुलिन्यासः ॥ अथ षडंगन्यासः ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गां हृदयाय नमः ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं
गीं शिरसे स्वाहा ॥ ॐ श्रीं क्लीं ग्लौं गं गूं शिखायै वषट् ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गैं कवचाय हुं ॥ ॐ श्रीं
ह्रीं क्लीं ग्लौं गं गौं नेत्रत्रयाय वौषट् ॥ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गः अस्त्राय फट् ॥ इत्यंगन्यासः ॥ अ ॥१७॥
थ पदन्यासः ॥ ॐ शिरसि ॥ श्रीं भ्रूमध्ये ॥ ह्रीं नेत्रयोः ॥ क्लीं श्रुत्योः ॥ ग्लौं नसोः ॥ गं वक्त्रे ॥ गणपतये

ह्रां वरदक्षहस्ते ॥ वरदवामहस्ते ॥ सर्वजनंनामे मेगुह्ये ॥ वशदक्षपादे ॥ मानयवामपादे ॥
स्वाहा कंधरे ॥ इति पदन्यासः ॥ अथ र्णोन्यासः ॥ मूलेन व्यापकं कृत्वा ॥ ॐ नमो ब्रह्मरंध्रे ॥ श्रीं शि
रसि ॥ ह्रीं नः भाले ॥ क्लीं दक्षनेत्रे ॥ ग्लौं वामनेत्रे ॥ गं दक्षकर्णे ॥ गं वामकर्णे ॥ णं दक्षनासि पं वाम
नासि ॥ तं जिह्वायां ॥ ये ओष्ठे ॥ वं अधरे ॥ रं कंठे ॥ वं दक्षहस्ते ॥ रं वामहस्ते ॥ दं हृदि ॥ सं दक्षस्तने ॥
वं वामस्तने ॥ जं नाभौ ॥ नं दक्षकुक्षौ ॥ मे वामकुक्षौ ॥ वं गुह्ये ॥ शं दक्षकट्यां ॥ मां वामकट्यां ॥ नं गु
दे ॥ यं दक्षपादाग्रे ॥ स्वां नमो वामपादाग्रे ॥ हं नमः कंधरे ॥ इति क्रमः ॥ व्युत्क्रमस्तु ॥ हां नमः कंधरे
स्वां वामपादाग्रे ॥ यं दक्षपादाग्रे ॥ नं मूलाधारे ॥ मां वामकट्यां ॥ शं दक्षकट्यां ॥ वं गुह्ये ॥ मे वामकुक्षौ ॥

॥ग॰प॥ नंदक्षजानुनौ॥ जंनाभौ॥ यंवामस्तने॥ संहृदि॥ रंवामकरे॥ वंदक्षकरे॥ रंकंठे॥ वंअधरे॥ यंओष्ठे
॥१८॥ तंजिह्वायां॥ पंवामनासि॥ णंनमोदक्षनासि॥ गंनमोवामकर्णे॥ गंनमोदक्षकर्णे॥ ग्लौंनमो
वामनेत्रे॥ लौंनमोदक्षनेत्रे॥ हूंनमोललाटे॥ श्रींनमःशिरसि॥ ॐनमोब्रह्मरंध्रेन्यसेदि
18 तिव्युत्क्रमः॥ पुनःॐनमइत्यादिह्रांनमइत्यंतंन्यस्य॥ म॰त्रिर्व्याप्येत्यक्षरंन्यासः॥ अथमा
तृकान्यासः॥ अंनमःशिरसि॥ आंनमःभाले॥ इंनमोदक्षिणभ्रुवि॥ ईंनमोवामभ्रुवि॥ उं ॥१प॥
दक्षकर्णे॥ ऊंवामकर्णे॥ ऋंदक्षनेत्रे॥ ॠंवामनेत्रे॥ लृंनसि॥ लॄंगंडयोः॥ एंनमःओष्ठे॥ ऐंनमो
अधरे॥ ओंनमोऊर्ध्वदंतपंक्तौ॥ औंनमोऽधोदंतपंक्तौ॥ औंनमोऽधोदंतपंक्तौ॥ अंमुखे

अं चिबुके ॥ कं गं गले ॥ खं कंठे ॥ गं पार्श्वे ॥ घं दक्षस्तने ॥ ङं नमो वामस्तने ॥ चं दक्षदोर्मूले ॥ छं
वामदोर्मूले ॥ जं दक्षकूर्परे ॥ झं वामकूर्परे ॥ ञं दक्षस्तने ॥ टं वामस्तने ॥ ठं दक्षकरपृष्ठे ॥ डं
वामकरपृष्ठे ढं ॥ णं नाभौ ॥ तं गुह्ये ॥ थं ऊर्वोः ॥ दं धं जानुनोः ॥ नं पं जंघयोः ॥ फं बं ग्रंथिस्था
नयोः ॥ भं मं पादतलयोः ॥ यं चरणांगुष्ठयोः ॥ रं कांच्यां वं ग्रीवायां ॥ लं करके ॥ लं हृदि ॥ शं
गुह्ये सं षं ॥ कर्णयोः सं गंडयोः हं नमो मालोन्यसेदिति भूषणन्यासः ॥ ततः त्रिखंडां
मुद्रां बध्वा महागणपतिं ध्यायेत् ॥ नवरत्नमयं द्वीपं स्मरेद्दिसरसांबुधौ ॥ तद्वीपे विधेतप
यं तं मंदमारुतसेवितं ॥ मंदारपारिजातादिकल्पवृक्षलताकुलं ॥ उद्भूतरत्नच्छायाभिरस

॥ग॰पू॥

णीकृतभूतलं ॥ उद्यद्दिनकरेंदुप्रभामुद्भासितदिगंतरं ॥ तस्य मध्ये पारिजातं नवरत्नमयं स्मरेत् ॥
॥१७॥ केतुन्निसेवितं षड्भिरनिशं प्रीतिवर्द्धनैः ॥ तस्याधस्तान्महापीठे रचिते मातृकांबुजे ॥ षट्कोणा
त त्रिकोणस्थं महागणपतिं स्मरेत् ॥ हस्तीन्द्राननचंद्रचूडमरुणच्छायं त्रिनेत्रं रसादाश्लि
ष्टं प्रियया सपद्मकरया स्वांकस्थया संततं ॥ बीजापूरगदाधनुस्त्रिशिखयुक्चक्राब्जपा
19 शोत्पलव्रीह्यग्रस्वविषाणरत्नकलशान्हस्तैर्वहंतं गजे ॥ गंडपाली गलद्दानपूरलालसमा
नसान् द्विरेफान् कर्णतालाभ्यां वारयंतं मुहुर्मुहुः ॥ कराग्रधृतमाणिक्यकुंभवक्त्रविनिःसृतैः ॥१७॥
रत्नवर्षैः प्रीणयंतं साधकं मदविह्वलं ॥ माणिक्यमुकुटोपेतं रत्नाभरणभूषितं ॥ एवंध्या

त्वापूर्ववन्मानसोपचारैराराध्य ज्ञा प्ररगदाधनुस्त्रिमूलचक्राअपाशो स्यतन्वीद्यम
दंतकलशविघ्रपरशुलडुमुद्राः प्रदर्शयेत्ताश्चनुर्दशामुद्रागुरुसंप्रदायतोऽवगंतव्या
इतिशिवं। ततः शंखस्थापनं कुर्यात्। तथ यामवामषट्कोणां तस्यत्रिकोणमध्येसात्रिन
त्रियदिकामारोप्यामूलेन षट्कोणंसंपूज्य फडिति शंखंप्रक्षाल्य तत्र संस्थाप्य नमइ
तिसंपूज्य। विलोममातृकया मूलेन चापूर्यं अंवह्निमंडलाय दशकलात्मनेनमइति। त्रि
पादकायां अंसूर्यमंडलाय द्वादशकलात्मनेनमइति शंखे। उंसोममंडलाय षोडश
कलात्मनेनमइति जले संपूज्य। गंगे चयमुने चेत्यं कुशमुद्रयाऽ तीर्थान्यावाह्य महाग

मद्दर्य अस्त्रेणार

॥ग॰प॥ णायते इहागच्छ तिष्ठ हृदयात् तत्र देवमावाह्य हुमिति निर्जनी ज्यामव गुण्ठ्य वषडिति गालि
॥२०॥ नीमुद्रां संरक्ष्य पुनरंगमन्त्रैः सकलीकृत्य गंधपुष्पाद्यैर्नमइति ॥ तत्र देवं संपूज्य तदुपरि
मत्स्यमुद्रयाच्छाद्य मूलमष्टधा जपेत् ॥ ततो वमिति धेनुमुद्रां प्रदर्श्यास्त्रेण संरक्ष्य तस्मा
20 त्किंचिज्जलं प्रोक्षणीपात्रे निधाय तेनोदकेनात्मानं पूजोपकरणं च शिरस्युक्षेत् ॥ तद्द[illegible]
स्ववामभागे सामान्यार्घ्योदकेन विशेषार्घ्यं स्थापयेत् ॥ सामान्यार्घ्यानरतः कलशोदै
स्थाप्यः ॥ सामान्यार्घ्यपूरणं कलशोदकेन ॥ सामान्यार्घ्यजलेन विशेषार्घ्यकरणं ॥ विशे ॥२०॥
षार्घ्योदकेन पदार्थसमर्पणं ॥ स्वपृष्ठे किंचिद्वामहस्तसमीपे हस्तप्रक्षालनपात्रं तैलदीपः

सिंहासनाग्रवामभागे घृतदीपस्थ। ततो न्यासक्रमेण शरीरे। आधारशक्त्यादि पूजयेत्
हृदि। ॐ आधारशक्त्यै नमः। कूर्माय। अनंताय। पृथिव्यै। क्षीरसागराय। श्वेतद्वीपाय। म
णिमंडपाय। कल्पवृक्षाय। मणिवेदिकायै। रत्नसिंहासनाय। दक्षिणस्कंधे। धर्माय। वामस्कंधे।
वामोरौ। वैराग्याय। दक्षोरौ। ऐश्वर्याय। मुखे। अधर्माय। वामपार्श्वे। अज्ञानाय। नाभौ। अवैरा
ग्याय। दक्षपार्श्वे। अनैश्वर्याय। पुनर्हृदि। अनंताय। पद्माय। अं सूर्यमंडलाय द्वादशकलात्मने
उं चंद्रमंडलाय षोडशकलात्मने। मं वह्निमंडलाय दशकलात्मने। सं सत्त्वाय। रं रजसे। तं तमसे।
आं आत्मने। अं अंतरात्मने। पं परमात्मने। ह्रीं ज्ञानात्मने। ततो हृत्पद्मस्य पूर्वादि केशरेषु

॥ग॰प॰॥

॥२५॥

21

धार शक्तीर्मध्ये पीठमनुं च पूजयेत् ॥ तीव्रायै ॥ ज्वालिन्यै ॥ नंदायै ॥ भोगदायै ॥ कामरू
पिण्यै ॥ उग्रायै ॥ तेजोवत्यै ॥ सत्यायै ॥ विघ्ननाशिन्यै ॥ तदुपरि मध्ये ॥ ॐ सर्वशक्तिकमला
सनाय नमः इति संपूज्य हृदये महागणपतिं ॥ विनानैवेद्यं गंधाद्यैः पूजयेत् ॥ ततउत्तमां
गहृदयमूलाधारपादसर्वांगकेषु मूलेन पंचपुष्पांजलीर्दत्वा यथाशक्ति मंत्रं जपित्वा
गुह्यातिगुह्येत्यादिना जपं समर्पयेत् ॥ सर्वमेतत्प्रोक्षणीपात्रस्याद्भिः कुर्यात् ॥ ततः प्रो
क्षणीजलं विसृज्य पूर्ववत् संपूज्येत्यंतर्यागः ॥ ततो बहिः पूजारंभेन पीठस्योत्तरे प्राक्प्र
त्यग्रेखांतरालेवायव्यादिशापर्यंतं ॥ ॐ गुरुभ्यो नमः ॥ ॐ गुरुपादुकाभ्यो नमः ॥ ॐ परम ॥२५॥

गुरुपादुभ्यो नमः॥ ॐ परमगुरुपादुकाभ्यो नमः॥ ॐ परापरगुरुभ्यो नमः॥ ॐ परापरगु
रुपादुकाभ्यो॥ ॐ परमेष्ठीगुरुभ्यो नमः॥ ॐ परमेष्ठीगुरुपादुकाभ्यो॥ ॐ आचार्येभ्यो
नमः॥ ॐ आचार्यपादुकाभ्यो नमः॥ पीठस्य दक्षिणे॥ ॐ गणेशाय॥ पीठस्य मध्ये तु॥ ॐ
आधारशक्तये॥ कूर्माय॥ अनंताय॥ पृथिव्यै॥ क्षीरसमुद्राय॥ श्वेतद्वीपाय॥ मणिमंडपा
य॥ कल्पवृक्षाय॥ मणिवेदिकायै॥ रत्नसिंहासना॥ अग्निकोणे धर्माय॥ नैरृत्यकोणे
ज्ञानाय॥ वायुकोणे वैराग्याय॥ ईशानकोणे ऐश्वर्याय॥ पूर्वादिकोणे चतुर्दिक्षु॥ अधर्मा
य॥ अज्ञानाय॥ अवैराग्याय॥ अनैश्वर्याय॥ मध्ये॥ अनंताय॥ पद्माय॥ अं सूर्यमंडला

॥ग.प॥

॥२२॥

22

यद्वादशकलात्मने नमः ॐ चंद्रमंडलाय षोडशकलात्मने ॥ मं वह्निमंडलाय दशकलात्म
ने सं सत्वाय । रं रजसे । तं तमसे । आं आत्मने ॥ अं अंतरात्मने । पं परमात्मने । ह्रीं ज्ञानात्म
ने ॥ मध्ये तीव्राये । ज्वालिन्ये ॥ नंदाये ॥ भोगदाये ॥ कामरूपिण्ये ॥ उग्राये ॥ तेजोवत्ये ॥ सत्या
ये । विघ्ननाशिन्ये ॥ ॐ सर्वशक्तिकमलासनाय नमः इति पूजयेत् ॥ ततो मूलेन सुषुम्ना पु
वर्त्मना ॥ स्वेंडारूपपुष्पं जल्या हृत्स्थं देवं मूर्त्तौ यंत्रे वा प्रकल्प्य पूजयेत् ॥ देवेश भक्तिसु
लभ परिवारसमन्वितः ॥ यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरो भवेत्युक्त्वा मूलमुच्चार्य
श्रीमहागणपते इहागच्छ इति तिष्ठ स्थापयेत् आवाहयेत् ॥ स्थापयित्वा स्थापयेत् ॥ संनिधापय ॥२२॥

२१

मा संनिधापयेत् ॥ संनिरोधिन्या संनिरोधयेत् ॥ संमुखीकरिण्या संमुखीकुर्यात् ॥ अवगुंठिन्या
वगुंठयेत् षडंगमंत्रैः सकलीकरणं कुर्यात् ॥ ततः मुद्रास्संप्रदायतेष्वगांतव्या ॥ ततः प्राणप्राण
प्रतिष्ठां कुर्यात् ॥ यथा ॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं श्रीमहागणपतेः सर्वेन्द्रिया
णि वाङ्मनश्चक्षुः श्रोत्रत्वग्जिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ इति प्रा
णान् प्रतिष्ठाप्य अर्घ्योदकेन देवं प्रोक्ष्यामृतीकृत्य परमीकुर्यात् ॥ ततः आसनं वामिति प्रो
क्ष्य मलांते इदमासनं ॥ श्रीमहागणपतये नमः इति देववाम भागे दत्वा मलांते ॥ इदमासनं
श्रीमहागणपतये निवेदयामि इति पद्माकराभ्यां निवेद्य जल आसनाद्युपचारार्थं पुष्पं सम

र्पयामि नमः॥ जलं समर्पयामि नमः॥ ततो मूलांते अधोमुखाभ्यां कराभ्यां कुशलं ते इति
कुशलप्रश्नं कृत्वा मूलांते श्रीमहागणपते स्वागतं ते इति प्रश्नः स्वागतं॥ ऊर्ध्वमुखकराभ्यां
जलपुष्पं निवेदयेत्॥ मूलांते नमः एतत्पाद्यं श्यामाकदूर्वाब्जविष्णुक्रांतासहितं॥ श्रीमहाग
णपतये तुभ्यं समर्पयामि नमः इत्यगुष्टं वस्त्रध्यानामांजलिनायादं वुजेदत्ता जलपुष्पं
निवेदयेत्॥ सामान्यार्घोदकेनैतत्॥ मूलांते स्वधा जातीलवंगकंकोलात्मकमाचमनीयं श्रीम
हागणपतये तुभ्यं सं॰॥ मूलांते स्वाहा॥ इदमर्घ्यं गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वा
न्वितं श्रीमहागणपतये तुभ्यं सं॰॥ इत्यंजलिना शिरसि निवेद्य जलपुष्पं दद्यात् मूलांते आ ॥२३॥

ध्यरघिमधुसंमिश्रं मधुपर्कं महागणपतये नुभ्यं स ॥ इत्यधोमुखेन मुक्तकनिष्ठेनांगु ॥४२
ष्ठस्पृष्टानामिकेनामुखे दत्वा जलपुष्पैर्दद्यात् ॥ अयत्तोद्गमधिकं ॥ ततः पूर्ववत्पुनराच
मनीयं ननु अथर्वणोक्तगणपतिसूक्तेन पौरुषेण वेति स्नानं केचिदाहुः ॥ तच्चैवैदिकानां
णामनावश्यकत्वान्नेत्यन्ये ॥ ततः स्नानमंडपे देवमानीय पूर्ववदासनं पाद्यमर्घ्यमा
चमनीयं च दत्वा सुगंधितैलाद्युत्तेन पूर्वकमुद्वर्तनं गंधोदकेन तीर्थोदकैः स्नम्लं
तइदं स्नानीयं श्रीमहागणपतये निवेदयामीति मुक्तकनिष्ठेनाधोमुखेन दत्त मुष्टिना
निवेद्य जलपुष्पं दद्यात् ॥ पूर्ववदाचमनीयं दत्वा पुनराचमनीयं ॥ ततो ताम्रलेन यथाशक्ति

गंधयुक्तोदकेर्देवं अभिषिंचेत॥ ततो वस्त्रं व मिति प्रोक्ष्य। तत्र विसृं संपूज्य मूलांते इदं व
॥२५॥ स्त्रं श्रीमहागणपतये निवेदयामि नम इति वस्त्रं परिधार्य॥ उत्तानेनांगुष्ठस्पृष्टेन मध्यम
नदक्षपाणिना निवेद्य जलपुष्पं दद्यात्॥ पूर्ववदाचमनीयं पुनराचमनीयं एवं मुत्तरीयं
25 दत्वाचमनीयं पुनराचमनीयं॥ ततः पादुके उपनीय दक्षिण दिग्गत नत्र मंडपे आनीय
तत्रासनमास्तीर्योपवेश्यालंकारं व मिति प्रोक्ष्य तत्र विसृं संपूज्य। मूलांते श्रीमहागणप
तये एतानि भूषणानि निवेदयामि नम इति उत्तानेनांगुष्ठस्पृष्टेनानामिकेन दक्षपाणिना
निवेद्य जलपुष्पं दद्यात्। पादुके दत्वा देवं सिंहासने समुपवेश्य। चंदनकर्पूर कस्तूर्यागुर्वा ॥२५॥

तमकं ॥ अष्टगंधात्मकं वायव्यानदुक्तं प्रपंचसारे ॥ चंदनागुरु कस्तूरी कुंकुमं रक्तचंदनं ॥ गोरो
चनं निशा सिंदुमष्टगंधं गणेशितुः ॥ १ ॥ यद्वा रुद्रयामले ॥ केशरं रोचनामांसी कस्तूरी अग
रुस्तथा ॥ सुचंदनं च मुस्ता च रक्तचंदनकं तथा ॥ अष्टगंधं विनिर्दिष्टं महागणपतेः प्रिय
तिवा ॥ एतानि समभागानि गंधं वामिति प्रोक्ष्य तत्र विसृज्य मूलांते इमान् गंधान् श्रीम
हागणपतये निवेदयामि नम इति ज्येष्ठाङ्गुलि निष्ठाभ्यां निवेद्य जलपुष्पं दद्यात् ॥ ततः पुष्प
मयपर्युषितं चमिति प्रोक्ष्य मूलांते इदं पुष्पं श्रीमहागणपतये वौषडिति दूर्वांकुरान् नि
वेदयामि इति तत्तन्नामभिः पूजयेत् ॥ प्रयोगस्तु मूलांते ॐ गणाधिपाय नमः ॥ दूर्वायुग्मं स ॥

॥ग॰प॥

॥२५॥ इत्यादिनामांतरमुद्यमम्॥वर्ज्यंपुष्पाणि॥गौतमीये॥मलिनंभूमिसंस्पृष्टंक्रिमिके
शादिदूषितंपर्युषितानिपुष्पाणिवर्जयेद्देवतार्चने॥ज्ञानार्णवे॥पुष्पैपर्युषितैर्देवि
नार्चयेत्स्वर्णजैरपि॥निर्माल्यभूतकुसुमैरुच्छिष्टैःपरमेश्वरि॥वाराहीये॥पलाशकुसु
मैर्देवीनार्चयेद्दूरतस्त्यजेत्॥तथादेवीनामर्कमंदारौआदित्येतगरंतथा॥गणेशाय
चसर्वांपरंपुष्पमतिप्रियं॥तथा॥उक्तंगंधमगंधंचक्रिमिकेशादिदूषितं॥वासोभिः
संभृतंनीतंमतिमान्नार्पयेच्छिवे॥शिवेत्स्युयलक्षणं॥तथा॥पुष्पाणांचजलेनापिद्रू ॥२५॥
पा१ र्वातंडुलेनच॥नित्यपूजाप्रकर्तव्याभक्तिभावेनसुंदरी॥इतिमूर्ध्निहृदयपादसर्वांगेषु

पंचपुष्पांजलीर्दत्वा॥आवरणमग्रजामारभेत्॥त्रिकोणगर्भेषट्कोणंवसुपत्रंततोलि
खेत् भूगृहंचचतुर्द्वारंयुतंयंत्रंगणेशितुः॥१॥अत्रदिङ्नियमस्तु मालिनीतंत्रे॥पूज्य
पूजकयोर्मध्ये प्राचीतिमन्यतेबुधैः॥तद्दक्षिणंदक्षिणंस्यादुत्तरंचोत्तरंमतं॥पृष्ठंतुप
श्चिमंज्ञेयंसर्वत्रैवप्रयोजयेत्॥अनेनविधिनामंत्रीपूर्वादौपूजनंचरेत्॥इति॥इंद्रा
दिपूजनंतुप्रसिद्धैवदिक्स्वदिक्षुपूजयेदिव्यान् जातिरित्यादिसंपुटानित्युक्तेः॥दत्वा
पुष्पांजलिंतस्मैध्यात्वातंचयथाविधि॥अनुज्ञांप्रार्थयेन्मंत्रीपरिवारसमर्चने॥इत्यनु
ज्ञांप्राप्ययजेत्॥तद्यथा॥त्रिकोणाद्वाह्यपूर्वादिचतुर्दिक्षुपूर्वंविल्वदक्षाधः॥ॐश्रीं श्रीं

॥ग॰पा॥ पतिप्रजयाभ्यांनमः॥ दक्षिणेवरदहस्ताधः॥ गौरीभ्यांनमः॥ पश्चिमेपिप्पलवृक्षाधः॥
॥२६॥ रतिरतिपतिभ्यांनमः॥ उत्तरेप्रियंगुवृक्षाधः॥ महीवराहाभ्यांनमः॥ रे वताग्रेलक्ष्मीगण
26 नाथाभ्यांनमइति पूजयेत्॥ दयाब्धेत्राहिसंसारसर्पान्मां शरणागतं॥ भक्त्यासम
र्पयेतुभ्यं प्रथमावरणार्चनमिति पुष्पांजलिंदद्यादिति प्रथमावरणं॥ षड्द्राणेष्वपूर्वे
णे॥ ॐ सिद्धिसहितआमोदायनमः॥ अग्निकोणे॥ ॐ समृद्धिसहितप्रमोदायनमः॥
ए शान्यां कांतिसहितसुमुखायनमः॥ पश्चिमे॥ मदनावतीसहितदुर्मुखायनमः॥ ॥२६॥
नैरृते मदद्रवासहितविघ्नाय नमः॥ वायव्ये द्रावणीसहितविघ्नकर्त्रे नमः॥ षड्द्र

श्री २

णस्या नयया र्श्वयोः ॥ ॐ दक्षिणे ॥ ॐ वसुंधरा सहितं शंखनिधये नमः ॥ वामे वसुमती सहि
तपद्म निधये नमः ॥ इत्याद्येः ॥ द्वितीयावरणार्चनमिति द्वितीयं पुष्पांजलिः ॥ सर्वत्र ॥ तत
ऽष्टदलकेसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु चा ॥ ॐ ह्रीं क्लीं ग्लौं गां गों हृदयाय नमः ॥ हृदयांग
देवतां पूजयामि नमः ॥ एवं गीं शिरसे स्वाहा ॥ इत्यादि षडंगं न्यसेत् ॥ इत्याद्ये तृतीयावर
णार्चनमिति तृतीयं ॥ अस्यार्थः ॥ अग्निनिरृतिवाय्वीशानकोणेषु हृदयाद्यंगचतु
ष्टयं पूर्वदक्षिणपश्चिमोत्तरकोणेषु प्रत्येकं मस्त्रं त्रिकोणमध्ये नेत्रं पूजयेदिति ॥ पत्रमध्ये
षु प्रणवादि नमोंतेन ब्राह्म्याद्या मातरः दीर्घस्वराद्याः प्रागादितः पूजयेत् ॥ यथा ॥ ॐ आं ब्रा

॥ग॰प॥

॥२७॥

27

ह्यै नमः॥ ई माहेश्वर्यै॥ ऊं कौमार्यै॥ ऋं वैष्णव्यै॥ लृं वाराह्यै॥ ऐं इन्द्राण्यै॥ औं चामुंडायै॥ अं अः
महालक्ष्म्यै॥ दयाध्ये॥ चतुर्थावरणार्चनमित्यादि चतुर्थं॥ ततो भूगृहे पूर्वादिक्रमेण॥ लं इंद्रा
य॥ रं अग्नये चतुर्थावरणार्चनमित्यादि चतुर्थं॥ यं यमाय॥ क्षं निर्ऋतये॥ वं वरुणाय॥ यं वा
यवे॥ सं सोमाय॥ ईं ईशानाय॥ इंद्रेशानयोर्मध्ये॥ आं ब्रह्मणे नमः॥ निर्ऋतिवरुणयोर्म
ध्ये ओं ह्रीं अनंताय नमः॥ दयाध्ये॥ पंचमावरणार्चनमित्यादि पंचमं॥ ततः पूर्वादि वज्रा
य॥ शक्तये॥ दंडाय॥ खड्गाय॥ पाशाय॥ अंकुशाय॥ गदायै॥ त्रिशूलाय॥ पद्माय॥ चक्रा ॥२७॥
य नमः॥ सर्वत्र प्रणवादि नमोन्तता देया॥ षष्ठमावरणे तमम्॥ एवं वदन्प नो॥ इति षष्ठं॥

इत्यावरणपूजा॥ सावरणं देवं संपूज्य ततो इक्षुरसादिना चतुश्चत्वारिंशदाढ्यं चतुः
शतं॥ ४४४ प्रतिदिनं सावरणं देवं संतर्प्पेत हि विधिस्तत्कल्पादवगंतव्यो विमलाशय
ये यथा॥ पूर्ववदाचम्य तत एव प्राणानायम्य देशकालावुल्लिख्य श्रीमहागणपतिप्रीत्यर्थं
चतुश्चत्वारिंशदुत्तरं चतुःशतमिक्षुरसादिद्रव्येण तर्प्पणं करिष्ये॥ यथा॥ मंत्रेणाथ पु
रा मुनेवं चतुरावृत्त्या समानर्प्यैव श्रीशक्तिः स्मरमन्मथविनायकरतिर्नाम्नैव बीजादिकं
आमादादिनिधिद्वयं च सचतुः पूर्वं चतुर्वारकं मंत्रैस्तर्प्पणतत्परोभिलषितं संप्राप्नु
यान्मंडलात्॥ १॥ अस्यार्थः॥ मूलं॥ ४॥ मंत्रेणेति दशविधा विभक्तमंत्रेण यथा॥ ॐ तर्पयामि ४॥

॥ग॰प॥ म॰८॥श्री॰४म॰४॥ह्रीं॥४म॰४॥क्लीं॥४म॰४॥ग्लौं॥४म॰४॥गं॥४॥गणपतये॥४म॰४॥वरवरद॰॥४म॰४
॥२८॥ सर्वजनंमेवश॥४म॰४॥मानयस्वाहा॥४म॰४॥एवमशीति॥८०॥अथपुरश्चरणशरी
रंतत्संबन्धीन्येकादशायुधानितर्पयेत॥यथा गं बीजापूरं॰४म॰४ ग्लां गदां ४म॰४ क्लीं
28 इक्षुकार्मुकं॰४म॰ग्लौं चक्रायं॰म॰ गं विषाणं॰४म॰४ ॐश्रींह्रींक्लीं ग्लौं गं रत्नकलशं॰४
म॥४॥एवमष्टाशीति॥८८॥अमुनेवतिदशगणपतीन्तर्पयेत॥विघ्नोविनायकोवीरः शू
रोवरदस्तथा। इभवक्त्रश्चैकदंतोलंबोदरगणास्तथा॥क्षिप्रप्रसादनश्चैव महागणप ॥२८॥
तिस्तथा॥यथा॥ॐश्रींह्रींक्लींग्लौंगंविघ्नगणपतयेवरवरदसर्वजनंमेवशमानाय

स्वाहा नमः ४म्. ४एवमुत्तरत्राप्यि॥ विनायकगणाय। ४म्. वीरगणा। ४म्. ई॥ शूरगणा
म्. ४ ई॥ वरगणा. म्. ॥४ ई॥ इभवक्त्रगणा॥ ४म्॥४ ई॥ एकदंतगणा॥४ म्. ४ ई लंबोदरगणा॥४ ई॥ क्षिप्र
प्रसादनगणा. ४ म्॥ ४ ई॥ महागणपति गणपतये॥ ४म्. ॥४ एवंतर्पणान्यासीति॥ ८॥ ४ श्रीं गं
रमेशं ४म्. ४॥ गं श्रीं रमां॥ ४ ह्रीं गं महेशं॥ ४म्॥ ४॥ गं ह्रीं उमां. ४॥ क्लीं गं मदनं॥ म्. ॥ ४॥ गं क्लीं रतिं ४
म्. ४ ग्लौं गं वराहं ४म्. ४ गं ग्लौं महीं॥ ४म्॥ ४॥ एवं चतुर्षष्ठी॥ ६४॥ श्रीं गं आमोदं॥ ४ म्॥ ४॥ गं श्रीं सि
द्धिं. ४म्. ४ ह्रीं गं प्रमोदं॥ ४ म्॥ ४॥ गं ह्रीं समृद्धिं॥ ४म्. क्लीं गं सुमुखं॥ ४म्॥ ४॥ गं क्लीं कांतिं॥ ४॥ म्. ४
ग्लौं गं दुर्मुखं॥ ४म्॥ ४॥ ग्लौं मदनावतीं॥ ४म्॥ ४॥ गं गां विघ्नं॥ ४ म्. गं गं मदद्रवां॥ ४म्॥ ४॥ ग्लौं गं

विघ्नकर्त्तारं। मू.४ गं ह्रीं द्राविणीं। मू.४ हूं गं शंखनिधिं। ४ मू.४॥ गं ह्रीं वसुधारां॥ ४ मू.४॥ ग्लौं
गं पद्मनिधिं॥ ४ वीत्यं ज्ञातव्यः साधकोत्तमैः॥ ६॥ इति तत्कथितं भद्र तर्पणं परमाद्भुतं। म
हागणपतेर्गोप्यं न वाच्यं कस्यचित्त्वया॥ ११॥ इति कामना भेदाः। मंत्रकोशमतेन तु॥ मू.
मंत्रेणैव पूर्वसंख्यांके तर्पणं विदध्यात्॥ तत्पुरश्चरणं तु॥ अथ चत्वारि शतसहस्राधि
कं ४४८०० चतुर्लक्षं तर्पणं पुरश्चरणं॥ पूर्वोक्ते रथद्व्यं दशांशं हवनं॥ तर्पयेत्सलि
लं पुष्पैर्दिनशो गणनायकं॥ चतुःश्चत्वारिंशदाढ्यं चतुःशतमतन्द्रितः॥ मंडलादि
षु त्रिःस्नात्॥ १ अनेन कर्मणा श्री महागणपतिः प्रीयतां न मम इति तर्पणं॥ अताम्

लोतेइमान्तूंगंधान्सांगायसपरिवारायसायुधायसशक्तिकाय॥श्रीमहागणपतयेस
मर्पयामिनमइतित्रिगंधाद्यैःपूजयेत्॥ततोधूपपात्रमस्त्रेणप्रोक्ष्यहृदाभ्यर्च्यामती
हृत्स्यवामतर्जन्यास्पृश्य॥श्रीसुरभितेजसेस्वाहेतिगुग्गुल्वादिदहेत्॥दशांगधूपस
यथामधुमस्तंगंधंगुग्गुल्वगुरुशैलजं॥सरलंसिह्लसिद्धार्थंदशांगोधूपमुच्यते॥
दशांगोदशधटितःगुग्गुल्वगुरूनदक्षिणहस्तमध्यमानामामध्यपर्वांगुष्ठाग्रैर्धूपं
नीचैर्दद्यात्॥मूलांते॥इमंधूपंसांगायेत्यादिसमर्पयामिनमइतिनिवेदयेत्॥ततः
अगाध्वनिमंत्रमातःस्वाहा॥इतिदशाक्षरयाघंटांसंपूज्यवामहस्तेनवादयेत्॥द

दाहस्नेन नाभिदेशं ता रसं धूपयेत्॥ दीपपात्रमस्त्रेण प्रोक्ष्य हृदाभ्यर्च्य दीपं मायया
प्रज्वाल्य एवमिति प्रोक्ष्य॥ वाममध्यमया संस्पृश्य घृतदीपविह्नं ते त्वं दीपे वनस्पतिं सं
पूज्यम्लांते इमं दीपं मां गायत्र्यादि समर्पयामि नमः इत्यं तेन दक्षिणये तं दीपं मध्य
मयांगुष्ठाग्रस्पृष्ट्या घंटावादनपूर्वं निवेदयेत्॥ ततो जलपुष्पं दद्यात्॥ ततो मूलेन पु
ष्पांजलिं दत्वा नैवेद्यपात्रं साधारं चतुरस्रं मंडले कृत्वास्त्रेण प्रोक्ष्य चक्रमुद्रयाभिरक्ष्य
तदुपरि मूलमष्टधा जपित्वा धेनुमुद्रयामृतीकृत्य मूलमुच्चार्य पुष्पं निःक्षिप्य एवमिति प्रो ॥३०॥
क्ष्य पूर्ववत्यार्घमाचमनीयं दत्वा मूलेन तेजसा ... मां गायत्र्यादि नैवेद्यं समर्पयामि नमः

ति॥ अनामिकांगुष्ठस्पर्शयानिवेद्य मूलेनमनीपोशनं दत्वावामेनपाणिनाविकचोत्पला
कारां ग्रासमुद्रां दर्शयेत॥ अस्त्रेणादशोवध्याजवनिकाद्यंतार्हितोदेवं भुंजमानं ध्यायन्॥
मूलांते इदं वारुणंजलं श्रीमहागणपतये निवेदयाम्॥ जलपुष्पंदद्यात॥ ततोग्निंमूलेनापो
ऽभिषिच्य मूलांते॥ ॐ प्राणाय स्वाहा॥ कनिष्ठानामांगुष्ठयोगेन अपानाय स्वाहेति सर्वांगुलिभि
र्हुत्वा षडंगमंत्रैराहुतिषट्कं दद्यात् ततःमूलांते इदंवारुणंजलं॥ ततःस्ववामेत्रिकोणे वृत्तं चतुरस्रं
वापर्युपरि कृत्वा तत्र मंडलाय नम इति संपूज्य अर्घ्यार्थं पूर्णंसलिलं स्थापयेत तत्र भाजनं॥ ॐ
विघ्नकृत्सर्वभूतेभ्यो हुं स्वाहा॥ इति सामान्यार्घ्योदकेन बलिं दत्वा॥ ईशानवायुनिरृतिवा

कोणेषु त्रिकोणवृत्त चतुरस्रमंडलानि॥ स्वस्थानेषु मंडलायनमः इति संपूज्य क्रमेण वां वटुका
यनमः॥ यां योगिनीभ्यो नमः॥ क्षां क्षेत्रपालायनमः॥ गां गणपतयेनमः इति संपूज्य॥ एह्येहि
देवीपुत्र वटुकनाथ कपिलजटाभार भास्वरत्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय॥ सर्वोप
चारसहितं बलिं गृह्ण गृह्ण स्वाहेत्यनेन मंत्रेण वटुकाय बलिं दद्यात्॥ तत्वमुद्रां प्रदर्शये
त् ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वा तले वा पवनसलि
लयोर्यत्र कुत्र संस्थिता वा॥ क्षेत्रपीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः ॥३१॥
सदा नः शुभबलिविधिना पांतु वीरेंद्रवंद्याः॥ यां योगिनीभ्यः स्वाहा॥ सर्वयोगिनीभ्यः हुं

फट् स्वाहेत्यनेन बलिं दद्यात्। वामहस्तांगुष्ठतर्जनीमध्यमानामाभिर्यथान्याकारेण मुद्रां दर्श-
येत्। क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपालधूपादिसहितं बलिं गृह्ण २ स्वाहेत्यनेन क्षेत्रपालाय बलिं हरे-
त्। वाममुष्टिं तर्जनीसरलां कृत्वा मुद्रां प्रदर्शयेत्। गां गीं गूं गैं गौं गः गणपतये वर वरद सर्व-
जनं मे वशमानय बलिं गृह्ण २ स्वाहेत्यनेन गणपतये बलिं दद्यात्। वाममुष्टेर्मध्य-
मांगुलिं दंडवत् कृत्वा मुद्रां प्रदर्शयेत्। पूर्वोक्तमंत्रेन बलिं तत्र पूर्ववत्। ततः पूर्ववत् पुनराच-
मनीयं दत्वा करक्षालनाय जलं दद्यात्। ततो नैवेद्यमुद्धृत्य स्थलं शोधयेदिति बलिदानं। तत
ताम्बूल वासं मूलांते इदं लवंगादियुतं ताम्बूलं सांगाय दत्वा समर्पयामि नम इति द-

॥ग॰प॥ त्वा जलपुष्पोदघातं। ततः प्रसन्नार्घ्यं दत्वा छत्रचामरादर्शव्यजनादीन्। चोपचारान्समर्प्य
॥२२॥ येमूर्तिनः कांस्यादिभाजने कुंकुमादिना महागणपतियंत्रं विलिख्य तत्र कर्पूरगर्भिण्या
32 वर्त्या घृतपूरितान् भूपुरादिस्वरूपस्थानेषु परकोणेषु च दीपान् निधाय मध्ये त्रिको
णेषु पिष्टकादिरचितमस्तकोपरि महादीपं संस्थाप्य एवं त्रयोविंशतिदीपात्मकं मू
र्त्तोतदिदानीं महागणपतये समर्पयामि नमः इति मस्तकोंतं समुद्धृत्य चवारं नीराजये
त् एवं नेत्ररम्यत्वादिगुणहेतुना मयाभिहितं प्रणामसंयुक्तं प्राचां तेतु वसुदलेषु दीपाष्ट ॥३२॥
कं मध्ये त्रिकोणेषु एकं एवं नवदीपात्मकं वा नीराजयती एवं सपरिवारं देवं संपूज्य ततः

देवमनाभूत्वा सा ॐ स्मार चतुष्टयं बुद्धिरित्यादि पठित्वा ततः ॐ ष्यादि षडंगं न्यस्य ध्या
त्वा यथाशक्ति मूलं जपित्वा गुह्येत्यादिना अर्घ्योदकेन देवदक्षिणहस्ते जपं निवेद्य शंख
पराङ्मुखं स्थाप्य पुष्पैः प्रपूज्य दंडवत्प्रणिपत्य प्रदक्षिणां कृत्वा ततः चुलुकं उदकमादा
य ॥ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारितः जाग्रत्स्वप्नसुषुप्त्यवस्थासु कर्मणा मनसा
वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्नायत्स्मृतं ॥ यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणमस्तु स्वाहा मां
मदीयं सकलं सम्यक् श्रीमहागणपतये समर्पयेत् ॥ ॐ तत्सत् ॥ ततः ॐ ष्यादि षडंगं न्यस्य
ध्यात्वाष्टोत्तरसहस्रमष्टोत्तरशतं वा जपित्वा चुलुकउदकमादाय ॥ ॐ गुह्यातिगुह्यगोप्ता त्वं

प॰ग॰प॰॥
॥३३॥
33

गृहाणस्मत्कृतं जपं ॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितो ॥ इति देवदक्षहस्ते जपं
निवेदयेत् ॥ सामर्थ्याभावे पंचोपचारपूजामात्रं कृत्वा जपेत् ॥ जपान्ते ऋष्यादिध्यानं
तं विधाय प्राणानायम्य त्वं माले सर्वभूतानां प्रीतिदा शुभदा सदा ॥ शिवं कुरुष्व मे देव
यशो वीर्यं च सर्वदा ॥ ह्रीं सिद्ध्यै नमः इति शिरसि मालां निक्षिप्य संपुटे गोपयेत् ॥ ततो
निवेदनमंत्रेण सामान्यार्घ्यजलं दत्वा देवदक्षःहस्ते जपं समर्पयेत् ॥ ततः प्रदक्षिणां ३२
कृत्वा कवचादिभिः स्तवा साष्टांगप्रणामान् कृत्वा जय २ महागणपते यो भक्तिरचलास्तु त्व२
इति संप्रार्थ्य अर्घ्यपात्रमुद्धृत्य मूलं साधु वासाधु वा कर्म यद्यदाचरितं मया तत्सर्वं

श्रीगणाध्यक्षस्य गृहाणाराधनं परमिति ॥ श्रीमहागणपतिदक्षिणे हस्ते समर्प्य यथास्थान
मर्घ्यं स्थापयेत् पुनरर्घ्यं दत्वा देवतांगं ॥ आवरणदेवता विलयं विभाव्य पुष्पांजलिमू
लेन दत्वा प्रणमेत् ॥ श्रीमहागणपतितेजोरूपं ध्यात्वा समस्त गच्छ गच्छ परं स्थानं पर
मेश्वरः ॥ यत्र ब्रह्मादयो देवा न विदुः परमं पदमिति ॥ संहारमुद्रया पुष्पेण सहोद्धृत्य घ्रा
य वहन्नासारं ध्यायन् सहस्रदलकमलकर्णिकायां विश्राम्य सुषुम्नानाड्या हृद्यानी
तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठंतु मे हृदि इति
संस्थाप्य ध्यात्वा मानसोपचारैरभ्यर्चयेत् ॥ ततो ऐशान्यां मंडलिकां कृत्वा उच्छिष्टा

॥ग.प॥ णेशाय नमः इति निर्माल्य शेषं दत्वा पादोदकं पीत्वा यथासुखं विहरेत ॥ तदुक्तं निर्माल्य
॥३४॥ शिरसा धार्यं सर्वांगे चानुलेपनं नैवेद्यं चोपभुंजीत दत्वा तद्भक्तिशालिने देवतायाश्च
वसितं सलिलं शंखस्थितं ॥ अंगलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ निर्माल्यं
चोद्धरेन्नित्यं परितिष्ठितं ॥ अस्य पुरश्चरणं चतुश्चत्वारिंशत सहस्राधिकं चतुर्लक्ष जपः
४४४ ॥ कलौ चतुर्गुणमिति तद्दशांशमष्टद्रव्येण होमः ॥ यथा ॥ मोदकैः पृथुकैर्लाजैः
पर्व २ सक्तुभिः सेक्षुभिः ॥ नारिकेलैस्तिलैर्मुद्गैः सुपक्वैः कदलीफलैः ॥ अष्टद्रव्याणि विप्रस्य कथि ॥३४॥
तानि मनीषिभिरिति ॥ ॥ इति महागणपतिपद्धतिः समाप्ता ॥ ॥ संवत १८५५

प्रथमश्रावणवद्य ॥३॥ यादृशंपुस्तकंदृष्ट्वातादृशंलिषितंमया। यदिशुद्धमशुद्धंवाम
॥३५॥ मदोषोनदीयते॥१॥ जलाद्रक्षेत्तैलाद्रक्षेद्रक्षेच्छिथिलबंधनात् ॥ मूर्खहस्तेनदातव्यंए
वंवदतिपुस्तकी॥२ श्रीमहागणपतयेनमः॥ श्रीराधाकृष्णाभ्यांनमः॥ श्रीरामज॥

35

॥३५॥

पद्धतिः

श्रीगणपतिपद्धतिसमाप्तः [illegible] संख्या ३५

५१०